# आदर्शप्रश्नपत्रम् (2023-24)

**कक्षा : दशमी** **कोड न. 049**

**SET : A**

रोल नं० | | | | | | | | | | |

# संस्कृतम्

समयः - 3 होराः ] [ पूर्णाङ्काः : 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 11 तथा प्रश्न 16 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

- **सामान्यनिर्देशाः :-**

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति –**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 08 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 24 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 22 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 16 अङ्काः |

# खण्डः ‘क’

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

संस्कृतं हि सर्वासां भाषाणां जननी अस्ति । इयं भाषा सर्वभाषासु प्राचीनतमा अस्ति। अस्यां वेदज्ञानं वर्तते। वाल्मीकिमुनिना रामायणं नाम काव्यं संस्कृते एव लिखितम्। महाभारतम् अपि संस्कृतकाव्यम् अस्ति। प्राचीनकाले सर्वे जनाः संस्कृतभाषायामेव वदन्ति स्म । देशस्य एकतायै विश्वस्य शान्त्यै संस्कृतस्य महद् योगदानं भवितुं शक्नोति। प्राचीनसाहित्यं पठितुं संस्कृतस्य अध्ययनम् आवश्यकम् ।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(i) सर्वासां भाषाणां जननी का अस्ति ?
(ii) रामायणं नाम काव्यं कस्मिन् एव लिखितम्?
(iii) वाल्मीकिमुनिना किं नाम काव्यं लिखितम् ?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(i) प्राचीनसाहित्यं पठितुं कस्य अध्ययनम् आवश्यकम्?
(ii) कस्यां भाषायां वेदज्ञानं वर्तते ?
(iii) प्राचीनकाले जनाः कां भाषां वदन्ति स्म ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) 'नवीनतमा' इत्यस्य पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?
(क) प्राचीनसाहित्य (ख) प्राचीनतमा
(ग) सर्वभाषासु (घ) संस्कृतकाव्यम्

(ii) 'महाभारतम् अपि संस्कृतकाव्यम् अस्ति' अत्र किं क्रियापदम्?
(क) महाभारतम् (ख) अपि
(ग) संस्कृतकाव्यम् (घ) अस्ति

(iii) 'महद्' इति विशेषणपदस्य विशेष्यपदं किम्?
(क) संस्कृतस्य (ख) योगदानम्
(ग) संस्कृतकाव्यम् (घ) शक्नोति

(iv) 'महाभारतम् अपि संस्कृतकाव्यम् अस्ति।' अस्मिन् वाक्ये ‘अस्ति' क्रियायाः कर्तृपदं किं प्रयुक्तम्?
(क) महाभारतम् (ख) अपि
(ग) संस्कृतकाव्यम् (घ) वाल्मीकिमुनिना

## खण्डः 'ख'

## रचनात्मक-कार्यम्

2. (क) भवान् सुरेशः। प्रियमित्रं रमेशं प्रति विद्यालयस्य 'क्रीडादिवस-समारोहः' इत्यस्मिन् विषये लिखिते पत्रे मञ्जूषातः पदानि विचित्य रिक्तस्थानानि पूरयन्तु – 4

परीक्षाभवनम्

तिथिः 22.03.2023

प्रियमित्र रमेश!

सप्रेम नमो नमः।

अत्र कुशलं तत्रास्तु । अस्माकं विद्यालये परह्यः एव (i)...................... मानितोऽभवत् । तत्र विद्यालयस्य छात्राः अपूर्वेण (ii) ............................ विविधासु क्रीडासु भागग्रहणम् अकुर्वन् । कबड्डीप्रतियोगितायां कैश्चित् छात्रैः कलात्मकविधिना क्रीडित्वा दर्शकानाम् (iii) .......................... हृतानि। सर्वे तद् दृष्ट्वा अतिमोदमानाः। एवम् एष: समारोहः सर्वथा सफलः आसीत्।

भवतः प्रियः

(iv) ......................।

**मञ्जूषा**

| |
|---|
| क्रीडादिवसः, सुरेशः, मनांसि, उत्साहेन |

2. (ख) निर्दिष्टचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दैः उचितरिक्तस्थानानि पूरयित्वा लिखत - 4



(i) इदं चित्रम् .................... अस्ति ।

(ii) .................... मित्रैः सह कन्दुकेन क्रीडन्ति।

(iii) एका .................... रज्ज्वा क्रीडति ।

(iv) दम्पती परस्परं .................... कुरुतः ।

**मञ्जूषा**

| |
|---|
| बालकाः, उद्यानस्य, वार्तालापं, कन्या |

## खण्डः 'ग'

# पठित-अवबोधनम्

3. निम्नलिखितं गद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंह नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यक कार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुः गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।

**अथवा**

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः । तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावद् अगृह्णाच्च, परं विचित्रमघटत।

4. अधोलिखितश्लोकस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

मृगा मृगैः सङ्गमनुव्रजन्ति,
गावश्च गोभिः तुरङ्गास्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः,
समान-शील-व्यसनेषु सख्यम् ॥

**अथवा**

एकेन राजहंसेन या शोभा सरसो भवेत् ।
न सा बकसहस्रेण परितस्तीरवासिना॥

5. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्।

(ख) वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।

(ग) विचित्रा दैवगतिः।

(घ) यं यं पश्यसि तस्य तस्य पुरतः मा ब्रूहि दीनं वचः।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥

**अन्वयः :-**

'आचारः 1) .................... धर्मः' इति। एतद् 2) ................. वचः। तस्मात् 3) ......................... अपि विशेषतः 4) ......................... रक्षेत्।

**मञ्जूषा**

| |
|---|
| विदुषां, प्रथमः, सदाचारं, प्राणेभ्यः |

6. अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 3×1=3

(केवलं प्रश्नत्रयम्)

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत् ।

**प्रश्नाः :-**

(क) जनः कीदृशः आसीत् ?

(ख) जनः किं कृत्वा वित्तम् उपार्जितवान्?

(ग) तनयः कुत्र निवसन् अध्ययने संलग्नः समभूत् ?

(घ) जनः स्वपुत्रं कुत्र प्रवेशं दापयितुं सफलो जातः?

7. निम्नलिखितश्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 2×1=2

(केवलं प्रश्नद्वयम्)

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम् ।

अश्वचेद् धावने वीरः भारस्य वहने खरः ।।

**प्रश्नाः :-**

(क) अश्वः कस्मिन् वीरः भवति?

(ख) भारस्य वहने कः वीरः भवति?

(ग) संसारः खलु कीदृशः?

8. रेखाङ्कितपदानि आधृत्य कोष्ठकात् चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नत्रयम्) 3×1=3

(क) अम्भोदाः वृष्टिभिः वसुधां आर्द्रयन्ति । (काम् / कम्)

(ख) भृङ्गाः रसालमुकुलानि समाश्रयन्ते। (कानि / के)

(ग) पतङ्गाः अम्बरपथम् आपेदिरे। (के / कैः)

(घ) चातकः वने वसति। (कदा / कुत्र)

9. प्रश्नपत्रे लिखितश्लोकान् विहाय **'शेमुषी भाग-2'** पुस्तकाद् एकं श्लोकं संस्कृतभाषया लिखत। 1x4=4

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

10. (क) गुणसन्धेः अथवा व्यञ्जनसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) द्वन्द्वसमासस्य अथवा द्विगुसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ग) कर्मकारकस्य अथवा सम्प्रदानकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

11. यथानिर्दिष्टं शब्दरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) 'बालक' शब्दस्य सप्तमी-बहुवचने।

(ii) 'साधु' शब्दस्य पञ्चमी-एकवचने।

(iii) 'नदी' शब्दस्य द्वितीया-द्विवचने।

(iv) 'लता' शब्दस्य तृतीया-एकवचने।

(v) 'किम् (पु.)' शब्दस्य चतुर्थी-बहुवचने।

(vi) 'राम' शब्दस्य चतुर्थी-द्विवचने।

12. यथानिर्दिष्टं धातुरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) 'गम्'(गच्छ्) धातोः लोट्लकारः, म. पु.-एकवचने।

(ii) 'दृश्'(पश्य्) धातोः लङ्लकारस्य, प्र. पु.-द्विवचने।

(iii) 'प्रच्छ्' धातोः लृट्लकारस्य, उ. पु.-बहुवचने।

(iv) 'अस्' धातोः लट्लकारस्य, उ. पु.-द्विवचने।

(v) 'सेव्' धातोः विधिलिङ्गलकारस्य, म. पु.-एकवचने।

(vi) 'पठ्' धातोः लट्लकारस्य, उ. पु.-एकवचने।

13. प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिं कोष्ठकात् चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) पिता .................... कुप्यति। (पुत्रं / पुत्राय)

(ii) पिता ................... सह गच्छति। (पुत्रात् / पुत्रेण)

(iii) ................. विना न जीवनम्। (धनस्य / धनं)

(iv) सः .................... अन्धः। (नेत्राभ्याम् / नेत्रेण)

(v) .................... परितः वृक्षाः सन्ति। (ग्रामात् / ग्रामं)

14. अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत। (केवलं प्रश्नद्वयम्) 2×1=2

(i) प्राकृतिकवातावरणे क्षणं सञ्चरणम् ............... लाभदायकं भवति । (अपि / एव)

(ii) पर्यावरणस्य संरक्षणम् ................. प्रकृतेः आराधना। (एव / च)

(iii) .................... समयस्य सदुपयोगः करणीयः । (सदा / भृशम्)

15. निम्नक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत। (केवलं प्रश्नद्वयम्) 2×1=2

(i) सुगमः (ii) अनुसरति (iii) विहसति

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

16. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 16×1=16

(क) 'सम् + चरणम्' अत्र किं सन्धियुक्तपदम्?

(i) सम्चरणम् (ii) सण्चरणम्

(iii) सञ्चरणम् (iv) सन्चरणम्

(ख) 'तस्यापगमे' इत्यस्मिन् पदे कः सन्धिविच्छेदः?

(i) तस्य + अपगमे (ii) तस्या + अपगमे

(iii) तस्य + आपगमे (iv) तस्या + आपगमे

(ग) 'तुच्छजीवैः' इत्यस्य पदस्य विग्रहम् किम्?

(i) तुच्छैः जीवैः (ii) तुच्छाय जीवैः

(iii) तुच्छजीवाः (iv) तुच्छस्य जीवैः

(घ) 'पक्षीसम्राट्' इत्यस्मिन् पदे कः समासः ?

(i) द्वन्द्वः (ii) बहुव्रीहिः

(iii) तत्पुरुषः (iv) अव्ययीभावः

(ङ) 'सम्पन्नम्' इत्यस्य पदस्य विलोमशब्दः किम् ?

(i) धनम्  (ii) सम्पन्नता

(iii) विपन्नता  (iv) विपन्नम्

(च) 'क्षणेनैव' इत्यस्य पदस्य विलोमपदम् ?

(i) सुचिरेणैव  (ii) त्वरितमेव

(iii) आशुरेव  (iv) शीघ्रैव

(छ) 'सलिलम्' इत्यस्य पदस्य पर्यायपदम् किम् ?

(i) फलम्  (ii) जलम्

(iii) वनम्  (iv) जालम्

(ज) 'कुटिलम्' इत्यस्य पदस्य पर्यायपदम् किम् ?

(i) तक्रम्  (ii) सरलम्

(iii) वक्रम्  (iv) शक्रम्

(झ) 'वह् + तुमुन्' इत्यस्मिन् संयोगे किं रूपम् ?

(i) वहतुम्  (ii) वोहतुम्

(iii) वोढुम्  (iv) वोडुम्

(ञ) 'जानन्' इत्यस्मिन् पदे कः प्रत्ययः ?

(i) शतृ  (ii) क्त

(iii) तव्यत्  (iv) अन्

(ट) 'नवनवतिः' इत्यस्मिन् पदे का संख्या?

(i) 90  (ii) 95

(iii) 99  (iv) 89

(ठ) '25' इत्यस्य पदस्य किं संख्यावाचीपदम्?

(i) विंशतिः (ii) त्रिंशत्

(iii) पञ्चविंशतिः (iv) आचारः

(ड) 'अतिदीर्घः प्रवासः' अत्र किं विशेष्यपदम् ?

(i) अतिदीर्घः (ii) प्रवासः

(iii) अति (iv) दीर्घः

(ढ) 'उदात्तरम्यः समुदाचारः' अत्र किं विशेषणपदम् ?

(i) उदात्तरम्यः (ii) समुदाचारः

(iii) समुद् (iv) आचारः

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत -

बालकः प्रातः ............. वादने उत्तिष्ठति।




(i) द्वादश (ii) त्रयः

(iii) सप्त (iv) पञ्च

(त) अहं प्रातः ................ भ्रमणाय गच्छामि।




(i) चतुर्वादने

(ii) त्रयवादने

(iii) षड्वादने

(iv) दशवादने